# NCERT Solutions for Class 10 Sanskrit Shemushi Chapter 7 विचित्रः साक्षी

अभ्यासः

प्रश्न 1.
एकपदेन उत्तरं लिखत-

(क) कीदृशे प्रदेशे पदयात्रा न सुखावहा?
उत्तराणि:
विजनप्रदेशे

(ख) अतिथि: केन प्रबुद्धः?
उत्तराणि:
पादध्वनिना

(ग) कृशकायः कः आसीत्?
उत्तराणि:
अभियुक्तः

घ) न्यायाधीशः कस्मै कारागारदण्डम् आदिष्टवान्?
(उत्तराणि:
आरक्षिणे

ङ) कं निकषा मृतशरीरम् आसीत्?
(उत्तराणि:
राजमार्ग

प्रश्न 2.
अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) निर्धनः जनः कथं वित्तम् उपार्जितवान्?
उत्तराणि:
निर्धनः जनः भूरि परिश्रम्य वित्तम्, उपार्जितवान्।

(ख) जनः किमर्थं पदाति: गच्छति?
उत्तराणि:
अर्थ कार्येन पीडितः जनः बसयानं विहाय पदातिः गच्छति।

(ग) प्रसृते निशान्धकारे स किम् अचिन्तयत्?
उत्तराणि:
प्रसूते निशान्धकारे सः अचिन्तयत् – 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा'।

(घ) वस्तुतः चौरः कः आसीत्?
उत्तराणि:
वस्तुतः आरक्षी चौरः आसीत्।

(ङ) जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान्?
उत्तराणि:
जनस्य क्रन्दनं क्षुत्वा (निशम्य) आरक्षी उक्तवान्- "रे दुष्ट! तास्मिन् दिने त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारिता। इदानीं निजकृत्यस्य फलं भुक्ष्व अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्ड लप्स्यसे"।

(च) मतिवैभवशालिन: दुष्कराणि कार्याणि कथं साधयन्ति?
उत्तराणि:
मतिवैभवशालिनः दुष्कराणि कार्याणि नीति युक्तिं समालम्ब्य लीलया एव साधयन्ति।

प्रश्न 3.
रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत-

(क) पुत्र द्रष्टुं सः प्रस्थितः।
उत्तराणि:
कम्

(ख) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।
उत्तराणि:
कस्मै

(ग) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।
उत्तराणि:
कस्य

(घ) न्यायाधीशः बंकिमचन्द्रः आसीत्।
उत्तराणि:
कः

(ङ) स भारवेदनया क्रन्दति स्म।
उत्तराणि:
कया

(च) उभौ शवं चत्वरे स्थापितवन्तौ।
उत्तराणि:
कुत्र

प्रश्न 4.
यथानिर्देशमुत्तरत-

evidyarthi

(क) 'आदेश' प्राप्य उभौ अचलताम्' अत्र किं कर्तृपदम्?
उत्तराणि:
उभौ

(ख) 'एतेन आरक्षिणा अध्वनि यदुक्तं तत् वर्णयामि'-अत्र 'मार्गे' इत्यर्थे कि पदं प्रयुक्तम्?
उत्तराणि:
अध्वनि

(ग) 'करुणापरो गृही तस्मै आश्रयं प्रायच्छत्'-अत्र 'तस्मै' इति सर्वनामपदं कस्मै प्रयुक्तम्?
उत्तराणि:
निर्धनजनाय

(घ) 'ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्' अस्मिन् वाक्ये किं क्रियापदम्?
उत्तराणि:
आदिष्टवान्

(ङ) 'दुष्कराण्यपि कर्माणि मतिवैभवशालिनः'-अत्र विशेष्यपदं किम्?
उत्तराणि:
कर्माणि

प्रश्न 5.
संन्धि/सन्धिविच्छेदं च कुरुत-

(क) पदातिरेव – _________ + __________
(ख) निशान्धकारे – _________ + __________
(ग) अभि + आगतम् – _________
(घ) भोजन + अन्ते – _________
(ङ) चौरोऽयम् – _________ + __________
(च) गृह + अभ्यन्तरे – _________
(छ) लीलयैव – _________ + __________
(ज) यदुक्तम् – _________ + __________
(झ) प्रबुद्धः + अतिथि: – _________
उत्तराणि:
(क) पदातिरेव – पदातिः + एव
(ख) निशान्धकारे – निशा + अन्धकारे
(ग) अभि + आगतम् – अभ्यागतम्
(घ) भोजन + अन्ते – भोजनान्ते
(ङ) चौरोऽयम् – चौरः + अयम्
(च) गृह + अभ्यन्तरे – गृहाभ्यन्तरे
(छ) लीलयैव – लीलया + एव
(ज) यदुक्तम् – यत् + उक्तम्
(झ) प्रबुद्धः + अतिथिः – प्रबुद्धोऽतिथि:

https://www.evidyarthi.in/

प्रश्न 6.
अधोलिखितानि पदानि भिन्न-भिन्नप्रत्ययान्तानि सन्ति। तानि पृथक् कृत्वा निर्दिष्टानां प्रत्ययानामधः लिखत-

परिश्रम्य, उपार्जितवान्, दापयितुम्, प्रस्थितः, द्रष्टुम्, विहाय, पृष्टवान्, प्रविष्टः, आदाय, क्रोशितुम्, नियुक्तः, नीतवान्, निर्णतुम्, आदिष्टवान्, समागत्य, मुदितः।

| ल्यप् | क्त | क्तवतु | तुमुन् |
|---|---|---|---|
| .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. |

उत्तराणि:

| ल्यप् | क्त | क्तवतु | तुमुन् |
|---|---|---|---|
| परिश्रम्य | प्रस्थितः | उपार्जितवान् | दापयितुम् |
| विहाय | प्रविष्टः | पृष्टवान् | द्रष्टुम् |
| आदाय | नियुक्तः | नीतवान् | क्रोशितुम् |
| समागत्य | मुदितः | आदिष्टवान् | निर्णेतुम् |

प्रश्न 7(अ).
अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत-

(क) स बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवान्।
(ख) चौरः ग्रामे नियुक्तः राजपुरुषः आसीत्।
(ग) कश्चन चौर: गृहाभ्यन्तरं प्रविष्टः।
(घ) अन्येयुः तौ न्यायालये स्व-स्व-पक्षं स्थापितवन्तौ।
उत्तराणि:
(क) ते बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवन्तः।
(ख) चौराः ग्रामेषु/ग्रामे नियुक्ताः राजपुरुषाः आसन्।
(ग) केचन चौराः गृहाभ्यन्तरं प्रविष्टाः।
(घ) अन्येयुः ते न्यायालये स्व-स्व पक्षान् स्थापितवन्तः।

प्रश्न 7(आ).
कोष्ठकेषु दत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(क) सः _________ निष्क्रम्य बहिरगच्छत्। (गृहशब्दे पंचमी)
(ख) गृहस्थः _________ आश्रयं प्रायच्छत्। (अतिथिशब्दे चतुर्थी)
(ग) तौ _________ प्रति प्रस्थितौ। (न्यायाधिकारिन् शब्दे द्वितीया)
(घ) _________ चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्ड लप्स्यसे। (इदम् शब्दे सप्तमी)
(ङ) चौरस्य _________ प्रबुद्धः अतिथिः। (पादध्वनि शब्दे तृतीया)
उत्तराणि:
(क) गृहात्
(ख) अतिथये

https://www.evidyarthi.in/

(ग) न्यायाधिकारिणं
(घ) अस्मिन्
(ङ) पादध्वनिना

evidyarthi